National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2025; 1(63): 228-231
© 2025 NJHSR
www.sanskritarticle.com

**मधुमिता दासः**
विद्यावारिधिः शोधच्छात्रा,
साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरूपतिः

**Correspondence:**
**मधुमिता दासः**
विद्यावारिधिः शोधच्छात्रा,
साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरूपतिः

# कुमारविजयनाटके नाट्यतत्त्वानि

**मधुमिता दासः**

**शोधलेखस्य सारांशः –** आचार्यरामाशीषपाण्डेयेन विरचिते 'कुमारविजयम्' इति नाटके षडङ्काः सन्ति। बिहारप्रदेशीयस्य वीरकुमरसिंहस्य चरितमवलम्ब्य एतन्नाटकं सम्यग् ग्रथितमस्ति। स्वतन्त्रतान्दोलने संलग्नानां वीराणां मध्ये वीरकुमरसिंहस्य चरितं यादृशमुज्जलमस्ति न तादृशा बहुसंख्यकाः वीराः परिगणिताः। बिहारप्रदेशीयस्याऽयं कुमरसिंहो वृद्धावस्थायामपि यद्रणकौशलमुपस्थापितवान् तेन स सर्वदा कुमारसदृशः न कदापि वृद्धो जातः। 'कुमारविजयम्' एकम् ऐतिहासिकं वीररसप्रधानं संस्कृतनाटकमस्ति। अस्मिन्नाटके तस्य देशभक्तिः, साहसः, वीरता तथा स्वाधीनतां प्रति दृढसंकल्पः सुन्दररूपेण निरूपितः भवति। नाटकस्य आरम्भे देशस्य राजनैतिकपरिस्थितेः वर्णनं दृश्यते। तस्मिन् काले आङ्ग्लशासनस्य अत्याचारैः जनाः अत्यन्तं दुःखम् अनुभवन्ति स्म । एतां स्थितिं दृष्ट्वा कुमरसिंहः देशस्य स्वातन्त्र्यार्थं संग्रामं कर्तुं दृढनिश्चयं करोति । सः स्वसैनिकान् संगृह्य देशरक्षणाय तथा स्वराज्यप्राप्तये सज्जो भवति। नाटकस्य मध्यभागे कुमरसिंहस्य वीरता, युद्धकौशलं तथा नेतृत्वगुणाः प्रतिपादिताः सन्ति । सः स्वसैनिकान् प्रेरयति तथा आङ्ग्लसेनायाः विरुद्धे साहसेन युद्धं करोति। अस्मिन् प्रसङ्गे वीररसस्य प्रभावकरं चित्रणं दृश्यते। नाटकस्य अन्तिमभागे कुमरसिंहस्य पराक्रमस्य परिणामरूपेण शत्रवः पराजिताः भवन्ति । तस्य देशभक्तिः तथा त्यागभावना जनानां मनसि प्रेरणां जनयति। अतः 'कुमारविजयं' न केवलम् ऐतिहासिकनाटकम्, अपितु देशभक्तेः तथा वीरतायाः प्रेरणादायकं संस्कृतसाहित्यस्य महत्त्वपूर्णं कृतिरस्ति ।

**कूटशब्दाः -** देशभक्तिः, स्वातन्त्र्यम्, दृढसंकल्पः, राजनैतिकपरिस्थितिः, देशरक्षणम्, युद्धकौशलम्, पराक्रमः, त्यागभावना, देशप्रेमः, कर्तव्यपरायणता, प्रेरणादायकम् ।

**प्रस्तावना –** संस्कृतसाहित्ये नाटकविधायाः विशिष्टं स्थानं विद्यते। भारतीयकाव्यपरम्परायां नाटकं केवलं मनोरञ्जनस्य साधनं न, अपितु लोकशिक्षायाः, धर्मोपदेशस्य तथा सांस्कृतिकपरम्परायाः संरक्षणस्य अपि महत्वपूर्णं माध्यमं मन्यते । प्राचीनकालात् आचार्यैः नाट्यस्य स्वरूपतत्त्वप्रयोजनानि विस्तृतरूपेण विवेचितम्। विशेषतः नाट्यशास्त्रग्रन्थे आचार्यभरतमुनिना नाट्यस्य सर्वपक्षाः सम्यक् प्रकारेण निरूपिताः। नाट्यकारपाण्डेयमहोदयेन उक्तं यत् - "रसदृष्ट्या तु आनन्दातिरेके भिन्नत्वं नैव लक्ष्यते। पुष्करपलाशशतपत्रभेदनवदानन्दक्रमस्य ज्ञानं सामान्यतया न भवति परमानन्दानुभूतौ यथोत्तरतां सहृदयाः स्वीकुर्वन्त्येव।"[1] अस्मात् कारणात् संस्कृतसाहित्ये प्रसिद्धोऽयं वाक्यप्रचारः दृश्यते – **'काव्येषु नाटकं रम्यम्',** अर्थात् काव्येषु नाटकमेव सर्वाधिकं रमणीयम्।

नाट्यस्य प्रभावकारिता तस्य नाट्यतत्त्वानां समुचितसमन्वयेन एव सम्भवति। अस्मिन्नाटके ऐतिहासिकघटनानां सुन्दरं नाट्यरूपान्तरणं कृतम्। अतः अस्मिन् शोधपत्रे 'कुमारविजयनाटके' निरूपितानां नाट्यतत्त्वानां विस्तृतं विवेचनं क्रियते।

**कुमारविजयनाटके नाट्यतत्त्वानि -** नाट्यस्य प्रभावकारिता तस्य नाट्यतत्त्वानां समुचितसमन्वयेन एव सम्भवति। वस्तु, नायकः, नायिका, रसः, पात्राणि, अभिनयः, पञ्चसन्धिः इत्यादीनि प्रमुखानि

नाट्यतत्त्वानि सन्ति। एतानि तत्त्वानि संस्कृतनाट्यपरम्परायाम् अत्यन्तं महत्त्वपूर्णानि मन्यन्ते।

कविराजविश्वनाथेन साहित्यदर्पणग्रन्थे नाटकलक्षणं स्पष्टतया निर्दिष्टम्— **"नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम्"**[2] इति। अस्य लक्षणस्य तात्पर्यमिदं यत् यत्र नाटके कथावस्तु इतिहासपुराणादिषु प्रसिद्धा भवति तथा च पञ्चसन्धिभिः यथाविधि समन्विता भवति, तत् नाटकमिति कथ्यते। एतदेव लक्षणं 'कुमारविजयं' नाम्नि नाटके सम्यक् प्रकारेण प्रतिफलितं दृश्यते। अस्य नाटकस्य ख्यातवृत्तत्वं परिशीलनीयम् - अस्य नाटकस्य कथावस्तु भारतीयस्वातन्त्र्यसङ्ग्रामस्य प्रख्यातवीरस्य वीरकुमर-सिंहस्य जीवनचरितमाधारितमस्ति। सः भारतीयस्वाधीनता-सङ्ग्रामे अद्वितीयसाहसं प्रदर्श्य देशरक्षणे महत्त्वपूर्णं योगदानं कृतवान् । तस्य वीरता, देशभक्तिः, दृढसंकल्पः, त्यागशीलता च अस्मिन्नाटके प्रभावपूर्णरीत्या निरूपिताः सन्ति। अत्र पञ्चसन्धीनां यथोचितः विन्यासः परिलक्षितः भवति। नाट्यशास्त्रानुसारे मुखसन्धिः, प्रतिमुखसन्धिः, गर्भसन्धिः, विमर्शसन्धिः तथा निर्वहणसन्धिः इति पञ्चसन्धयः नाटकस्य प्रमुखाः संरचनात्मकाः अङ्गाः भवन्ति।

**कुमारविजयनाटके पञ्चसन्धिविषये वर्णनम् -**

संस्कृतनाट्यपरम्परायां कथानकविकासस्य विधानं नाट्यशास्त्रं तथा 'दशरूपकम्' इत्यादिषु ग्रन्थेषु विस्तरेण निरूपितमस्ति। आचार्यधनञ्जयेन दशरूपकग्रन्थे सन्धेः सामान्यलक्षणमुच्यते-

**"अन्तरैकार्थसम्वन्धः सन्धिरेकान्वये सति।**

**मुखप्रतिमुखे गर्भः सावमर्शोपसंहृतिः।।"**[3] इति।

एतेषां सन्धीनां समुचितप्रयोगः 'कुमारविजयनाटके' अपि स्पष्टतया परिलक्ष्यते। यत्र कथायाः प्रारम्भे बीजस्य संस्थापनं भवति तथा प्रधानकथावस्तुनः संकेतः प्रदीयते, सा मुखसन्धिः इति कथ्यते। अस्मिन् नाटके प्रारम्भभागे वीरकुमरसिंहस्य व्यक्तित्वस्य परिचयः, तस्य स्वातन्त्र्यभावनायाः उद्भवः तथा राष्ट्ररक्षणसंकल्पस्य प्रकाशनं दृश्यते। अनेन प्रकारेण अत्रैव सम्पूर्णकथानकस्य बीजं सुस्थापितं भवति। यत्र तस्य बीजस्य क्रमशः विकासः आरभ्यते तथा कथानकस्य प्रवाहः प्रगाढतां गच्छति, सा प्रतिमुखसन्धिः इति निर्दिश्यते। अस्मिन्नाटके वीरकुमरसिंहस्य शत्रुपक्षैः सह संघर्षः, स्वाधीनतासंग्रामसम्बद्धाः विविधाः प्रसङ्गाः अत्र सम्यग् निरूपिताः। कथानकः बहुविधघटनासंयोगेन जटिलतां प्राप्नोति तथा तस्य अन्तर्भावो गूढतया विकसितो भवति, सा गर्भसन्धिः इति कथ्यते। 'कुमारविजयनाटके' युद्धपरिस्थितेः उत्कर्षः, शत्रूणां विविधाः षडयन्त्रप्रयत्नाः तथा वीरकुमरसिंहस्य अद्भुतसाहस-प्रदर्शनं गर्भसन्धौ विशेषतः प्रकाशते। विमर्शसन्धिः नाटकस्य अत्यन्तं महत्त्वपूर्णा अवस्था अस्ति, अत्र कथानकस्य उत्कर्षः दृश्यते। दर्शकाः अस्याम् अवस्थायां नायकस्य विजयस्य निकटता अनुभवन्ति। अतः एषा सन्धिः नाटकस्य उत्कण्ठां, रोमाञ्चं तथा भावप्रभावं वर्धयति। अस्मिन्नाटके विमर्शसन्धौ वीरकुमरसिंहस्य शौर्यं, धैर्यं तथा युद्धकौशलं विशेषतया प्रकाशते। शत्रुसंघर्षस्य निर्णायकपरिस्थितिः अत्र दृश्यते तथा नायकस्य विजयस्य स्पष्टसंकेतः अपि लभ्यते। निर्वहणसन्धिः नाटकस्य समापनावस्था भवति। अस्यां सन्धौ दर्शकाः सम्पूर्णकथानकस्य फलितं स्पष्टतया पश्यन्ति। अतः एषा सन्धिः नाटकस्य भावार्थम्, उद्देश्यं तथा शिक्षां स्पष्टतया प्रकटयति। अस्मिन्नाटके अन्तिमे अङ्के निर्वहणसन्धिः दृश्यते, अत्र वीरकुमरसिंहस्य शौर्यस्य फलरूपेण शत्रूणां पराजयः तथा नायकस्य विजयः प्रदर्श्यते। तेन नाटकस्य मुख्यः उद्देश्यं वीरता, त्यागभावना तथा राष्ट्रप्रेमः सफलतया प्रतिपाद्यते। अतः अत्र निर्वहणसन्धिः कथानकस्य सम्यक् समापनं दर्शयति। पञ्चसन्धीनां समुचितप्रयोगेन अस्य नाटकस्य कथानकः सुसंगतः, प्रभावशाली च जातः।

**वस्तु (कथावस्तु)** - नाटकस्य मुख्याधारः कथावस्तु भवति। कथावस्तु एव नाटकस्य घटनाक्रमस्य मूलभूतं तत्त्वमस्ति। येन नाटकस्य समग्रकथानकः निर्मीयते तथा यत् नाटकस्य मुख्यविषयरूपेण व्यवह्रियते, तत् वस्तु अथवा कथावस्तु इति कथ्यते। एतत् कथावस्तु एव नाटकस्य आधाररूपेण तिष्ठति तथा सम्पूर्णनाट्यप्रवृत्तेः मूलकारणं भवति। संस्कृतनाट्यशास्त्रे विशेषतः दशरूपकग्रन्थे आचार्यधनञ्जयेन कथावस्तु त्रिविधा उच्यते-

**"प्रख्यातोत्पाद्यमिश्रत्वभेदात् त्रेधापि तत् त्रिधा ।**

**प्रख्यातमितिहासादेरुत्पाद्यं कविकल्पितम्।।"**[4]

**मिश्रं च सङ्करात्ताभ्यां दिव्यमर्त्यादिभेदतः।** इति

तानि- प्रख्यातवस्तु, उत्पाद्यवस्तु, मिश्रवस्तु च । एतेषां भेदानाम् उदाहरणानि 'कुमारविजयनाटके' अपि द्रष्टुं शक्यन्ते । यत् कथावस्तु इतिहासे प्रसिद्धमस्ति तत् प्रख्यातवस्तु इति कथ्यते। 'कुमारविजयनाटके' वीरकुमरसिंहस्य स्वतन्त्रतासंग्रामे वीरता, जगदीशपुरविजयः, आंग्लसैन्येन सह युद्धम् इत्यादयः प्रसङ्गाः इतिहासे प्रसिद्धाः सन्ति। अतः एते प्रसङ्गाः प्रख्यातवस्तु इति गण्यन्ते। यत् वस्तु कविना स्वकल्पनया निर्मितम्, इतिहासे न प्रसिद्धम्, तत् उत्पाद्यवस्तु इति उच्यते। 'कुमारविजयनाटके' केचन संवादाः, नाटकीयप्रसङ्गाः, पात्राणां भाववर्णनानि च कविकल्पनया रचितानि । एते अंशाः उत्पाद्यवस्तोः अन्तर्गताः भवन्ति । यत्र इतिहासप्रसिद्धवृत्तान्तः तथा कविकल्पना उभयमपि संयुक्तमस्ति, तत् मिश्रवस्तु इति कथ्यते। 'कुमारविजयनाटके' कुमरसिंहस्य ऐतिहासिकचरितम् आधारीकृत्वा, तस्योपरि कविना कल्पिताः संवादाः, प्रसङ्गाः, नाटकीयविस्ताराः च योजिताः। अतः सम्पूर्णं नाटकं मुख्यतः मिश्रवस्तु इति परिगण्यते।

'कुमारविजयनाटके' कथावस्तु ऐतिहासिकस्वरूपा अस्ति। अत्र आङ्ग्लशासनस्य अत्याचाराः, भारतीयानां स्वातन्त्र्यलालसा, तथा स्वदेशरक्षणार्थं कुमरसिंहस्य वीरतापराक्रमौ अत्यन्तं प्रभावकररूपेण चित्रितौ स्तः। रामाशीषपाण्डेयवर्येण घटनानां विन्यासः अत्यन्तं कुशलतया कृतः अस्ति। यथा—

* आङ्ग्लशासनस्य अन्यायपूर्णव्यवहारः
* भारतीयानां मनसि उत्पन्ना विद्रोहभावना
* कुमरसिंहस्य वीरता
* युद्धदृश्यानि
* अन्ततः विजयप्राप्तिः

एवं प्रकारेण कथावस्तु न केवलं रोचकत्वं धारयति, अपितु देशभक्तिभावनामपि जागरूकयति ।

**नायकः** - नायकः नाटकस्य प्रमुखपात्रं भवति। नाटकस्य मुख्यभावना नायकस्य चरित्रेण एव व्यक्ता भवति। नाट्यशास्त्रानुसारं नायकस्य गुणाः निम्नलिखितरूपेण निर्दिष्टाः—

**"त्यागी कृती कुलीनः सुश्रीको रुपयौवनोत्साही।**

**दक्षोऽनुरक्तलोकस्तेजवैदग्ध्यशीलवान् नेता।।"**[5] इति।

अर्थात् नायकः त्यागी, कृतज्ञः, शुचिः, स्थिरचित्तः, तथा लोकरञ्जकः भवेत् । यः पुरुषः त्यागशीलः, कृत्येषु निपुणाः, उत्तमकुले जातः, शोभनरूपयुक्तः तथा यौवनसम्पन्नः उत्साही च भवति, सः सर्वकार्येषु दक्षः भवति। यस्मिन् जनाः स्नेहं कुर्वन्ति, यः तेजस्वी, वैदग्ध्ययुक्तः तथा उत्तमशीलसम्पन्नः च भवति, स एव नाटकस्य मुख्यपात्रः अर्थात् नेता (नायकः) इति कथ्यते । 'कुमारविजयनाटके' नायकः वीरकुमरसिंहः अस्ति , तस्य चरित्रे नायकस्य सर्वगुणाः स्पष्टतया दृश्यते । अस्मिन्नाटके वीरकुमरसिंहस्य वीरतायाः वर्णनाप्रसङ्गे नाट्यकारेण उक्तम् यत्-

**"कुमारो युवराजोऽस्ति सत्यवक्ता दृढव्रती**
**लोकप्रियो युवा नेता सर्वथा राज्यरक्षकः।।"**[6]

**"यस्याङ्गानि दृढानि बज्रसदृशान्याभान्ति शौर्योदये**
**स्पर्धा येन जिता रथस्य वहने नूनं गजारोहणे।**
**अश्वारोहणमस्ति विश्वविदितं यो वै धुरारक्षको**
**राज्ये यो युवराजराजिलसितो सोऽयं कुमारो महान् ।।"**[7]

सः अत्यन्तं साहसी- धैर्यवान्-पराक्रमी तथा देशभक्तः च अस्ति। सः आङ्ग्लशासनस्य अन्यायस्य विरोधं करोति तथा स्वदेशस्य स्वातन्त्र्यार्थं संघर्षं करोति। तस्य नेतृत्वशक्तिः अपि अत्यन्तं प्रभावशाली अस्ति । नायकस्य एते गुणाः नाटकस्य मुख्यसन्देशं स्पष्टतया प्रतिपादयन्ति।

**नायिका -** संस्कृतनाटके नायिकायाः अपि महत्वपूर्णं स्थानं वर्तते। नायिका नाटकस्य भावात्मकपक्षं सुदृढं करोति। 'कुमारविजयनाटके' नायिका विभाविनी इति निरूपिता । सा कुमरसिंहस्य प्रति आदरं स्नेहं च प्रकटयति । तस्याः चरित्रे सौम्यता, शीलम्, कर्तव्यपरायणता च स्पष्टतया दृश्यते। अस्मिन्नाटके नायिका मुग्धा श्रेण्याः अन्तर्गताऽस्ति । सा नायकस्य साहसं प्रशंसति तथा तस्य कार्येषु समर्थनं ददाति । एवं प्रकारेण नायिकापात्रः नाटकस्य सौन्दर्यवर्धनं करोति ।

**कुमारविजयनाटके वीररसविषये वर्णनम् -** संस्कृतनाट्यपरम्परायां रसः नाटकस्य प्राणरूपः मन्यते। नाट्यशास्त्रग्रन्थे भरतमुनिना रसस्य उत्पत्तिः सूत्रेण प्रतिपादितमस्ति- **'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः।'**[8]

अर्थात् विभाव-अनुभाव-व्यभिचारिभावानां संयोगेन रसः उत्पद्यते। वीरता, साहसः, पराक्रमः, धैर्यः तथा कर्तव्यनिष्ठा इत्यादयः गुणाः वीररसस्य मूलतत्त्वानि सन्ति। 'कुमारविजयनाटके' मुख्यतः वीररसस्य प्रधानता दृश्यते। वीरकुमरसिंहः भारतीयस्वातन्त्र्य-संग्रामस्य महान् वीरः आसीत्। अतः नाटकस्य विभिन्नप्रसङ्गेषु वीररसः अस्ति ।

नाटके कुमरसिंहस्य साहसपराक्रमस्य वर्णनं वीररसस्य प्रमुखम् उदाहरणम् अस्ति। सः आङ्ग्लशासनस्य अन्यायस्य विरोधं कृत्वा स्वदेशस्य स्वस्य सेनया सह स्वातन्त्र्यार्थं युद्धं करोति । तस्य निर्भीकता तथा अदम्यसाहसं दर्शकानां हृदये उत्साहभावं जनयति । नाटकस्य युद्धदृश्येषु वीररसः विशेषतया प्रकटितः अस्ति । तत्र तस्य साहसं, धैर्यं तथा युद्धकौशलम् अत्यन्तं प्रभावकररूपेण चित्रितमस्ति। कुमरसिंहस्य नेतृत्वशक्तिः अपि वीररसस्य प्रकटीकरणे महत्त्वपूर्णा भूमिका वहति। सः स्वसैनिकान् प्रेरयति, तेषां मनसि उत्साहं जनयति तथा युद्धे विजयप्राप्तये प्रेरणां ददाति । नाटके देशभक्तिभावना अपि वीररसस्य अभिव्यक्तिं वर्धयति । तस्य एषा भावना दर्शकानां हृदये देशप्रेमभावनां जागरूकयति।

**कुमारविजयनाटके अभिनयविषये वर्णनम् –**

संस्कृतनाट्यपरम्परायाम् अभिनयः नाटकस्य अत्यन्तमहत्त्व-पूर्णतत्त्वं मन्यते। नाट्यस्य यथार्थप्रस्तुतीकरणम् अभिनयेन एव सम्भवति। नाट्यशास्त्रग्रन्थे भरतमुनिना अभिनयरूपाणां विस्तृतं विवेचनं कृतमस्ति। तत्र अभिनयरूपाणि चत्वारि निर्दिष्टानि सन्ति-

**"आङ्गिको वाचिकश्चैव आहार्यः सात्त्विकस्तथा।**

**चत्वारोऽभिनया ह्येते विज्ञेया नाट्यसंश्रयाः॥"**[9] इति।

अर्थात् अभिनयः चतुर्विधः भवति- आङ्गिकाभिनयः, वाचिकाभिनयः, आहार्याभिनयः तथा सात्त्विकाभिनयश्च। 'कुमारविजयनाटके' एतेषां चतुर्णामपि अभिनयरूपाणां सुन्दरप्रयोगं द्रष्टुं शक्यते ।

आङ्गिकाभिनयः शरीरस्य अङ्गोपाङ्गानां माध्यमेन भावप्रदर्शनमस्ति। अस्मिन्नाटके युद्धदृश्येषु, अश्वचालनप्रति-योगितासु, सैनिकानां गतिविधिषु च आङ्गिकाभिनयः स्पष्टतया

दृश्यते। विशेषतः कुमरसिंहस्य साहसपराक्रमस्य प्रदर्शनं शरीरप्रयासैः प्रभावकररूपेण प्रदर्शितमस्ति । अतः युद्धप्रसङ्गेषु आङ्गिकाभिनयस्य महत्त्वं विशेषतया दृश्यते। वाचिकाभिनयः संवादप्रयोगेन भावप्रकाशनं भवति।

कुमारविजयनाटके संवादाः स्पष्टाः, प्रभावशालिनः तथा वीरताभावेन परिपूर्णाः सन्ति। विशेषतः कुमरसिंहस्य वचनानि सैनिकानां मनसि उत्साहं जनयन्ति तथा युद्धे प्रेरणां ददति। आहार्याभिनयः वेशभूषाः, आभरणानि तथा रंगमञ्चीयव्यवस्थायाः माध्यमेन दृश्यते। अस्मिन्नाटके राजकीयवेशभूषा, सैनिकवेषभूषा तथा युद्धोपकरणानि नाटकस्य ऐतिहासिकस्वरूपं स्पष्टयन्ति। सात्त्विकाभिनयः अन्तःकरणे उत्पन्नानां भावानां स्वाभाविक-प्रकाशनमस्ति। अस्मिन्नाटके देशभक्तिभावना, क्रोधः, साहसः तथा दुःखभावः इत्यादयः भावाः पात्राणाम् अन्तःकरणे प्रकटन्ते। विशेषतः कुमरसिंहस्य देशप्रेमभावना सात्त्विकाभिनयस्य उत्कृष्टमुदाहरणं भवति ।

**कुमारविजयनाटके रंगमञ्चीयविषये वर्णनम्-**

संस्कृतनाट्यपरम्परायां रंगमञ्चीयः नाटकस्य अत्यन्तं महत्त्वपूर्णं तत्त्वं मन्यते । नाटकं केवलं पठनीयसाहित्यं न, अपितु दर्शकाणां समक्षे अभिनयेन सह प्रस्तुतं कर्तव्यं काव्यरूपमस्ति। अतः रंगमञ्चे नाटकस्य प्रस्तुतीकरणस्य उपयुक्तः रंगमञ्चः इति कथ्यते। 'कुमारविजयनाटके' रंगमञ्चः अत्यन्तं प्रभावकररूपेण दृश्यते। नाट्यकारेण घटनानां विन्यासः एवं कृतः यत् तानि दृश्यानि रंगमञ्चे सहजतया प्रस्तोतुं शक्यन्ते।

अस्मिन् नाटके विविधप्रकाराणि दृश्यानि सन्ति, यथा-सभादृश्यानि, युद्धदृश्यानि, उत्सवदृश्यानि तथा ग्रामीणजीवन-सम्बद्धानि दृश्यानि। एतेषां दृश्यानां प्रस्तुतीकरणं रंगमञ्चे अत्यन्तं रोचकं भवति। विशेषतः युद्धदृश्येषु सैनिकानां गतयः, अस्त्रप्रयोगः तथा साहसप्रदर्शनं दर्शकानां मनसि उत्साहं जनयति। अस्मिन्नाटके पात्राणां वेशभूषा, आभरणानि तथा युद्धोपकरणानि रंगमञ्चीयानां सौन्दर्यं वर्धयन्ति।

**निष्कर्षः -** अस्मिन् शोधप्रबन्धे 'कुमारविजयं' नाटकस्य नाट्य-तत्त्वदृष्ट्या सम्यक् परीक्षणं कृतम्। तस्मात् ज्ञायते यत् अस्य नाटकस्य कथावस्तु, नेता, रसः, पात्रविन्यासः तथा सन्धिविन्यासः इत्यादीनि नाट्यशास्त्रीयतत्त्वानि समुचितरूपेण विन्यस्तानि सन्ति। नाटकस्य कथावस्तु वीरकुमरसिंहस्य जीवनचरितमवलम्ब्य रचिता अस्ति, यत्र वीरता, देशभक्तिः तथा आत्मोत्सर्गस्य आदर्शः प्रभावपूर्णरीत्या प्रकाश्यते। नायकः धीरोदात्तगुणयुक्तः, येन नाटकस्य प्रधानः रसः वीररसः सफलतया निष्पन्नः भवति। विभाव-अनुभाव-व्यभिचारिभावानां समुचितसंयोगेन रसप्रकाशनं यथार्थ-तया सम्पन्नमस्ति। आङ्गिक-वाचिक-आहार्य-सात्त्विकाभिनयानां प्रयोगः अपि नाट्यप्रस्तुतेः सौन्दर्यं वर्धयति। तथा च मुख-प्रतिमुख-गर्भ-विमर्श-निर्वहणः इति पञ्चसन्धीनां क्रमबद्धप्रयोगेन कथानकस्य विकासः सुसंगतः भवति। एतेषां सर्वेषां नाट्यतत्त्वानां समन्वयेन नाटकं केवलं मनोरञ्जनस्य साधनं न भवति, अपि तु शिक्षाप्रदं, प्रेरणादायकं तथा राष्ट्रभावनां जागरयितुं समर्थं भवति। अतः निष्कर्षतः वक्तुं शक्यते यत् कुमारविजयनाटकं नाट्यशास्त्री-यतत्त्वानां सफलप्रयोगस्य उत्कृष्टमुदाहरणमस्ति, यत् संस्कृतनाट्य-परम्परायाः गौरवं वर्धयति तथा वीरचरित्रस्य आदर्शप्रतिपादनं करोति।

**सन्दर्भग्रन्थसूची**


१. पाण्डेय, मिथिलेश, आधुनिक संस्कृत का इतिहास, राधा पलिकेशन्स,२०२२।

२. त्रिपाठी, राधावल्लभ, आधुनिक संस्कृत साहित्य का समग्र इतिहास, निउ भारतीय वुक कपौरेशन २०२३ ।

३. शास्त्री, आचार्यः कृष्णमोहन, साहित्यदर्पणः, चौखम्बा संस्कृत संस्थान, २०२२ ।

४. मुखोपाध्याय,डा. विमलाकान्त, साहित्यदर्पणः, संस्कृत पुस्तक भाण्डारः २०२३।

५. चतुर्वेदी, प्रो. ब्रजमोहन, नाट्यशास्त्रम्, विद्यानिधि प्रकाशन, २०२४ ।

६. रस्तोगी, सुधा, नाट्यशास्त्रम्, चौखम्बा कृष्णदास अकादमी, २०१७ ।

७. जोशी, डा. यशवन्त कुमार, नाट्यशास्त्रम्, आयुर्वेद संस्कृत हिन्दी पुस्तक भण्डार, जयपुर, २०१५ ।

८. त्रिपाठी, डा. रमाशङ्कर, दशरूपकम्, विश्वविद्यालय प्रकाधान, वाराणसी, २०१७ ।

९. आचार्य,डा. सीतानाथ, दशरूपकम्,संस्कृत पुस्तक भाण्डारः,२०१६ ।

१०. उपाध्याय, डा. रामजी, भारतीय विद्या संस्थान, वाराणसी, २००० ।

११. पाण्डेय, डॉ. रामाशीष। कुमारविजयम् । प्रवोध संस्कृत प्रकाशनम्, २००४ ।


**पादटिप्पणी**

[1]कुमारविजयम्. पृ-1

[2]साहित्यदर्पणः.6.7

[3]दशरूपकम्-1.23

[4]दशरूपकम्-1.15

[5]साहित्यदर्पण. 3.35

[6]कुमारविजयम्-3.10

[7]कुमारविजयम्-3.20

[8]नाट्यशास्त्र-6.31

[9]नाट्यशास्त्र- 6.23